# समावेशितशिक्षायां बाधाः परिष्काराश्च

डॉ. ए. सच्चिदानन्दमूर्तिः
सहायकाचार्यः, शिक्षाविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

भारतीयसंविधानस्य मौलिकाधारेषु सत्सु समानतायाः अधिकारः अन्यतमः प्रप्रथमश्च वर्तते।तथैव 2009(RTE) आर्.टी.इ. अनुसारं देशं प्रति बालः षड्वर्षात् चतुर्दशवर्षवयस्काः सर्वेऽपि बालाः अवश्यमेव निःशुल्क एवम् अनिवार्यतया शिक्षाम् अधिगच्छेयुः ।अनेन ज्ञायते यत् शिक्षायाः एवं साक्षरतायाः प्रामुख्यम् अधिकं वर्तते इति । यदि बालः शिक्षितः भवति तर्हि सः स्वस्य, अन्येषां, समाजस्य एवं राष्ट्रनिर्माणे सहायकः भवति ।

शिक्षायाः नैकानि क्षेत्राणि सन्ति । तत्र विशिष्टाशिक्षा अन्यतमा भवति । "विशिष्टशिक्षा" सा भवति यत्र छात्राणां विशिष्टशैक्षिकावश्यकतानां पूर्तये वैयक्तिकभेदानुसारं शिक्षणं प्रदीयते । एषा केवलं विशिष्टछात्रेभ्यः दीयते । अत्रैव समावेशितशिक्षायाः प्रसङ्गः अपि भवति ।

**समावेशितशिक्षा- Inclusive Education.**

समावेशितशिक्षा तादृशं वातावरणं कल्पयति यत्र सर्वेऽपि अधिगन्तारः वर्ग-लिङ्ग- अधिगमशैली-जातिः-भाषा-मतभेदं विना समानतया शिक्षां प्राप्नुवन्ति । अर्थात् छात्रेषु परस्परं भेदभावं विना पठन-पाठनप्रक्रिया यत्र भवति सा समावेशितशिक्षा इति कथयामः ।

**समावेशितशिक्षायाः वैशिष्ट्यानि –**

i) छात्रकेन्द्रितशिक्षणं भवति
ii) समानावकाशाः छात्रेभ्यः कल्प्यन्ते
iii) अध्यापकः सर्वान् छात्रान् अधिगमप्रक्रियायां समावेशयति
iv) अत्र अधिकतया आर्थिकव्ययः न भवति
v) सर्वकाराधिकाराणां याथार्थीकरणम्
vi) परस्परं विभिन्नछात्रयोः सम्बन्धकल्पनम्
vii) विविधच्छात्राणां विविधावश्यकतानां परिपूरणम्
viii) समावेशितशिक्षायाः शैली इदमित्थमिति निर्दिष्टा न भवति
ix) विभिन्नाः मूल्याङ्कनपद्धतयः
x) अध्यापकः सर्वदा सकारात्मकचिन्तनं कुर्यात्
xi) अध्यापकः पाठने अत्यन्तं नावीन्यं प्रदर्शयेत् ।
xii) प्रत्येकमपि छात्रस्य गणना समानतयैव भवति ।

अनेन इदं स्पष्टं भवति यत् समावेशितशिक्षा तादृशी शिक्षा भवति या अधिगमे एवं शिक्षणप्रक्रियायां बाधान् दूरीकरोति । तर्हि समावेशितशिक्षायां काः बाधाः ? कथं समुत्पन्नाः? एवं तेषां निवारणं कथमिति विवरणं साम्प्रतं प्रदीयते ।

**समावेशितशिक्षायां बाधाः –**

समावेशितशिक्षायां प्रतिबन्धकानाम् अथवा बाधानां विभागः द्विधा क्रियते । यथा – **आन्तरिकबाधाः , बाह्यबाधाः** चेति ।अत्र आन्तरिकबाधास्तु प्रायशः छात्रे अथवा छात्रपक्षतः वैयक्तिकं भवति । परं बाह्यबाधास्तु छात्रातिरिक्तं यद्यद् भवति ततः समुद्भवति । आद्यम् आन्तरिककारकाणि इमानि भवन्ति । यथा –

**i) अभिवृत्तिः –**

- परस्परं छात्रयोः अक्षमबालकानां अवगमने क्लेशः भवति ।
- अक्षमबालकानां मनसि सामान्यबालकानाम् अपेक्षया निम्न अथवा नीचभावना भवति।
- अक्षमबालकाः अवगमनाय दीर्घकालं स्वीकुर्वन्ति ।
- अक्षमबालकाः अन्यैः सामान्यबालकैः सह सामञ्जस्यस्थापने समस्याम् अनुभवन्ति।
- अक्षमबालकाः असुरक्षितभावान् सिञ्चन्ति ।
- अक्षमबालकाः वक्तुं लज्जाम् अनुभवन्ति ।
- सामान्यबालकाः अक्षमबालकान् प्रति नकारात्मकप्रवृत्तिः ।
- सामान्यबालकानां पितरौ ये भवन्ति, तेषाम् अवगमः, आवश्यकताः भिन्नाः भवन्ति।
- अध्यापकानां रुचिः सर्वेभ्यः छात्रेभ्यः पाठने न भवति ।
- अक्षमबालकानां स्वातन्त्र्यं न्यूनमेव भवति ।
- अक्षमबालकाः संकुचिताः सन्तः अन्तर्मुखिनः बहिः वक्तुम् अशक्ताः भवन्ति ।

**ii) शारीरिककारकाणि –**

- कक्ष्यायाम् अक्षमबालकः साधनानां प्रयोगे अशक्तः भवति ।
- यदि विद्यालयः समुचितस्थाने न भवति तर्हि तेनापि कारणेन छात्रस्य दुर्बलता दृश्यते।
- समुचितव्यवस्थाकल्पने विद्यालयः सक्षमः न दृश्यते ।

**iii) विद्यालयकारकाणि –**

- विद्यालयस्य वातावरणम् एवं परिवेशः तु सदैव अक्षमबालकेभ्यः आनुकूल्यं कल्पयेत् ।
- विद्यालयप्रबन्धकास्तु अस्मिन् विषये विशिष्टश्रद्धां स्थापयेयुः । परं तथा न दृश्यते एव। कुत्रचित् विद्यालयेषु एतत् नास्त्येव ।
- विद्यालयीय सहयोगसेवा (Support Service) अपि एतदर्थं सदा सर्वदा सिद्धाः न भवन्ति एवं न सन्ति ।
- विद्यालयेषु समुचितसाधनानि नोपलभ्यन्ते यथा चक्रासन्दः, प्राविधिकसाधनानि, संक्रामकः (Walker), सोपानानि इत्यादीनि न भवन्ति ।
- विद्यालयेषु आर्थिकसहायता एतदर्थं विशिष्य न दीयते । परं वस्तुस्थितिस्तु एतदर्थं अधिकं धनम् अपेक्ष्यते एव ।

**iv) पाठ्यक्रमः –**

- अक्षमबालकेभ्यः कीदृशः पाठ्यक्रमः भवेत् इत्येव न जानन्ति । अज्ञात्वा असम्बद्धपाठ्यक्रमेण बालकानां समस्या अधिका एव जायते ।

- अक्षमबालकानाम् आवश्यकतानुगुणम् एवं सामान्यबालानाम् अपेक्षानुगुणं सः पाठ्यक्रमः निर्मेयः ।
- ततः सः पाठ्यक्रमः तथा भवेत् येन स्व भावानाम् अभिव्यक्तीकरणे यः कोऽपि छात्रः क्लेशं वा समस्यां नानुभवेत् ।

**v) पारिवारिकीसमस्याः –**

- वस्तुतः पित्रोः दायित्वम् अधिकतया अस्ति । यतः विद्यालयम् अतिरिच्य अधिकः कालांशः गृहे एव भवन्ति । अतः यावत् अध्यापकाः विद्यालये प्रयत्नं कुर्वन्ति तावत् गृहे पितृभ्यां कार्यम् भवति । परं बहुत्र एवं न दृश्यते ।
- तदा तदा पित्रोः मेलनम् अध्यापकैः सह प्रायः न भवति । मन्दं मन्दं रुचिम् अपि परित्यजन्ति।
- अक्षमबालकानां परिवारसदस्याः अधिकं न वाञ्छन्ति परं सः अक्षमबालकः न्यूनातिन्यूनं सामान्यः भवेत् इत्येतावन्मात्रं चिन्तयन्ति ।
- ततः अक्षमबालकानाम् आर्थिकीसमस्या अत्यधिका दृश्यते । परिवारसदस्याः सहयोगं न यच्छन्ति ।
- गृहे परिवेशः अक्षमबालकानुसारं भवेत् । तेन सह अन्यथा व्यवहारः न स्यात्। तेन सः इतोपि खिन्नः भविष्यति ।

**vi) सहपाठिनः –**

- समवयस्काः छात्राः परस्परं यदि उत्तमसम्बन्धं न स्थापयन्ति तर्हि बलहीनः अक्षमः बालकः समस्याम् अनुभवति ।
- द्वयोः छात्रयोः अवगमः न भवति ।
- सहयोगभावनायाः अभावः दृश्यते कक्ष्यासु ।
- सामान्यबालकाः अक्षमबालकानां विषये सामान्याभिज्ञानमपि न जानन्ति ।
- सहपाठिनां व्यवहारे, ज्ञाने, अभिवृत्तौ च नकारात्मकता अधिकतया दृश्यते।

सम्प्रति बाह्यकारकाणां विषये विश्लिष्यते । यथा –

**i) अध्यापकसम्बद्धसमस्याः –**

- अध्यापकाः कांश्चन छात्रान् अवगम्य अन्यान् परित्यजन्ति तर्हि छात्रेभ्यः समस्याः आयान्ति ।
- अध्यापकानां रुचिः छात्रेषु विभिन्नेभ्यः कारणेभ्यः जायते यथा- राज्य, भाषा, जाति, लिङ्ग इत्यादिः । अतः एषा समस्या अत्यन्तं बृहती वर्तते ।
- अप्रशिक्षिताः अध्यापकाः समावेशितकक्ष्याम् अवगन्तुमेव न शक्नुवन्ति ।
- प्राविधिकसाधनैः अपरिचितः अध्यापकः सदैव छात्रेभ्यः दूरे तिष्ठति । सः शिक्षकः कदापि अक्षमबालकानां समस्याः नावगच्छति ।
- अनुदेशनसाधनानां प्रयोगे निष्णाताः अध्यापकाः अत्यन्तं विरलाः दृश्यन्ते ।

**ii) शैक्षिकसमस्याः –**

- सूचनासम्प्रेषणविधेः प्रयोगः न कुर्वन्ति अध्यापकाः । यदि कुर्वन्ति तर्हि सामान्यबालकान् उद्दिश्यैव कुर्वन्ति ।

- शिक्षायाम् अक्षमबालकानां नीतयः सन्ति । परं समावेशितकक्ष्यायां सामान्यबालकान् उद्दिश्यैव तस्याः नीतेः प्रयोगः क्रियते ।
- समावेशितकक्ष्यायां अधिकसंख्याकाः छात्राः भवन्ति चेत् अक्षमबालकानां समस्या जायते ।
- यद्यपि एताः समस्याः परिदृश्यन्ते तथापि एतासां समाधानम् अस्माकं परमं कर्तव्यं भवति । अत्र केचन सूचनाः निष्कर्षाश्च सन्ति ।

## परिहाराः-

तासां समस्यानाम् परिहाराः इमे भवन्ति । यथा-

I. **सहयोगाधिगमः** – छात्रः, अध्यापकः एवं पित्रोः सहयोगेन एव अक्षमछात्रः अग्रे गन्तुं पारयति । अत्र एतेषां सर्वेषां सहयोगः समानतया अपेक्ष्यते।सहपाठिनः सहयोगः यदा भवति तदा तस्य प्रभावः अत्यधिकः भवति।
II. पाठ्यक्रमस्य निर्माणं समुचितं भवेत् ।
III. अधिकः समयः समावेशितकक्ष्यायाः पाठ्यसामग्रीनिर्माणाय देयः भवति ।
IV. अध्यापकानां प्रशिक्षणम् एतदर्थं विशिष्य भवेत् ।
V. विद्यालयीयवातावरणं समुचितं स्यात् ।
VI. आर्थिकरीत्या विद्यालयपक्षतः सहयोगः भवेत् ।
VII. पारिवारिकसदस्याः अपि गृहात् आवश्यकतानां पूर्तिः यथा भवेत् तथा पश्येयुः छात्रान् ।
VIII. यस्य छात्रस्य यत्र अक्षमता विद्यते तत्र तस्य अधिकः भारः न भवेत् ।
IX. कक्ष्यायाम् अपेक्षित साधनानि, विद्युतादि अवश्यं कल्पयेत् ।
X. क्रीडा पद्धतिः अधिकतया आश्रयणीया भवति ।
XI. पाठ्यसहगामिक्रियासु एतेषाम् अन्तर्भावः भवेत् ।
XII. छात्रेभ्यः मानसिकस्तरे अभिप्रेरणाप्रदानम् ।
XIII. पाठ्यपुस्तकस्यापि बालकानुगुणं परिवर्तनं भवेत् ।

अतः अस्माभिः इदम् अवगम्यते यत् यदा समावेशितकक्ष्याः भवन्ति तत्र यावत् शक्यं छात्रान् अवगम्य तदनु स्वव्यवहारः प्रदर्शनीयः । एतेन अक्षमछात्राः अपि सामान्याः भवितुम् अर्हन्ति ।